चित्राङ्गद उवाच ।

"हे ब्राह्मणा हे गुरवो ! मामेवातिनिरागसम् ।
कथं धेनुर्भवन्तो हि विप्ररूपा ह ईश्वराः ॥
मुखाद्वो श्रुतवान् यद्यत्स्तुतिः का तत्समाचरन् ।
उपास्यो यत्तद्भवितुं सर्व्वे युष्योगिनः स्तुव ॥
जानेऽहं ब्राह्मणो यस्य स्वेच्छया विविधाकृतिः ।
नानालीलामाचरितुं मानुषाकृतिरप्यभूत् ॥
तद्ब्रह्म ब्राह्मणं जाने जाने तत् सर्व्वरूपधृक् ।
राजेति संज्ञाधारी कः किं वा तव प्रजाभिधम् ॥
तदेव सकलस्थायि तदेव सर्व्वकर्तृ च ।
तदेव सर्व्वपाट् स्यात्तदेव सर्व्वहर्तृ च ॥
पुंरूपं चैव स्त्रीरूपं क्लीवरूपञ्च नान्यथा ।
आत्मा एवैकरूपं तत् स्वमेवानेकमाकरोत् ॥
नानाप्रकारजीवादि चात्मनात्मानमेव हि ।
स्थावरं जङ्गमं विप्रास्तदेव नात्र संशयः ॥
भवन्तो हीश्वराः सर्व्वे किमर्थंयथ तत् कथम् ।
कथं चिन्तयथात्मानं देवमर्चनकाजतः ॥
छलेन भूतशुद्ध्यादि कृत्वा देवाः स्युरेव किम् ।
हंसोऽपि मानुषाकृत्या हंसत्वप्राप्तये पुनः ॥
यद्युद्योगी भवेत्तत् किं मानुषोऽहं न तच्चरे ।
अन्यायि न भवेद्ब्रह्म यूयमन्यायिनः कथम् ॥
वगलापि च या जप्या सा च ब्राह्मण एव हि ।
कश्चिद्विशेषो भेदोऽपि वगलायां द्विजेऽपि न ॥
अतस्तद्भवितुं विप्रा अहमप्येव तापसः ।
गुर्व्वाज्ञा मे पुराभूच्च सर्व्वं त्यक्त्वा जपं कुरु ॥
अतोऽहं सकलं त्यक्त्वा केवलां वगलां जपे ।
वगलायां द्विजे नैव कश्चिद्भेदोऽस्ति शासने ॥
अतो विप्रोऽस्मीति कामं कृतवान् जपकर्म्मणि ।
गुरौ विप्रे मनौ चापि देवे चात्मनि भूसुराः ॥
मसीशजातिः किञ्चिच्च न विशेषं विचिन्तयेत् ।
ब्राह्मणोऽप्यविशेषश्च तस्मिंस्तस्मिंश्च भूसुराः ॥
आत्मन्यात्मनि कीटेऽपि चेति वो जातिलक्षणम् ।
मूर्खोऽहं यच्च श्रुतवान् प्रभवो ब्राह्मणास्यतः ॥
तदाचरितवान् मे को दोषोऽस्ति वदत द्विजाः ।
विनापराधतो विप्रा यूयं वामनरूपतः ॥
बलिच्चातिप्रियं मत्तमधः प्रास्थापयन् यदि ।
अहं कीटोऽत्र नाश्चर्य्यं किमधो न पटे कथम् ॥
शताब्दिविष्टोऽहं वत्सरं शतसंख्यया ।
प्रथमे सम्प्रहं विप्रा गच्छताहमधः पटे ॥
अधोगच्छाम्यहं तत्र किञ्चित् खेदं करोमि न ।
वाञ्छयामीति चाज्ञा वो न लङ्घ्या भवतु क्वचित् ॥
इत्यादि श्रुत्वा हे कालि ! लज्जां प्राप्यातिखेदिताः ।
ब्रुवन्ति चातिमधुरं क्रन्दन्त इव ते द्विजाः ॥
हे चित्राङ्गद ! हे विद्वन् ! दौर्म्मनस्यं त्यज वत्स !।
दुश्चिन्तां कुरु मा तात भद्रं ते कथयामि ते ॥
जगत्तपोबलेनैव सर्व्वं भवितुमर्हति ।
नार्हतीशं विना तात ब्राह्मणो भवितुं किल ॥
इतीश्वराज्ञा वेदेऽस्ति प्रतिजानीहि तत्त्वतः ।
वरं प्राप्नोति देवत्वं ब्राह्मणत्वं कदापि न ॥
यथामरत्वमीशेन विना क्वापि न शासने ।
मा दुःखी त्वमधो गच्छ सुखेन वगलां जप ॥
कल्पेदशसहस्राब्दि नागलोकेश्वरो भव ।
ततस्त्रिलोकनाथस्त्वमिन्द्रतुल्यो भविष्यसि ॥
राज्यं भुक्त्वा ततो नैव पुनरावर्त्तनं तव ।
सदा वयं तव शिवं चिन्तयामो न भीं कुरु ॥
के जानन्तीदृशं त्वां हि भक्तश्रेष्ठं विवेचकम् ।
शापं दारुणमाकल्पमधुना तन्न खण्डति ॥
तात गच्छ सुखं भुङ्क्ष्व नागलोकेऽपि विस्तरात् ।
तत आनन्दमनसा गतश्चित्राङ्गदस्तदा ॥
स्वस्थानं ब्राह्मणाश्चापि चागच्छन् लज्जितान्तराः ।
भूयो मसीशः सर्व्वोऽपि विप्रदासाभिधोऽभवत् ॥
विप्रप्रसादात् शूद्राणामपि श्रेष्ठो बभूव ह ।
वगलेति महामन्त्रं सर्व्वेषां सर्व्वकामदम् ॥
केवलेन जपेनैव लक्षेण कालि ! सिध्यति ।
वशीकरणकर्म्मादि दशसाहस्रतो भवेत् ॥
अथ वक्ष्ये महेशानि ! वगलासाधनं तव ।
वगलेति मनोः संख्या पुरश्चरणकर्म्मणि ॥
लक्षेण मन्त्रसिद्धिः स्यात् नास्त्यत्र युगसंख्यकम् ।
ततो वश्यादि कर्त्तव्यं दशसाहस्रसंख्यया ॥
शरीरारोग्यतो वापि धनेच्छुश्चायुतं जपेत् ।
कलावेतस्य हि मनोः प्रभावं किं ब्रवीमि ते ॥
सहस्रमात्रहोमेन सर्व्वसिद्धिर्न चान्यथा ।
नास्त्यपेक्षा हि ऋष्यादेः स्तुतिपाठादिकस्य वा ॥
स्तुतिर्व्वा कवचं वापि ऋष्यादिन्यास एव वा ।
वगलेति स्वयं सर्व्वं सिद्धविद्या इति प्रिये ! ॥
त्वयाद्यारूपया कालि ! स्वयमुक्तं पुरैकदा ।
शरीरारोग्यतो देवि ! वैरिनिग्रहतोऽपि वा ॥
दिवा नक्तञ्च कर्त्तव्या सहस्रमानतो ऽऽहुतिः ।
केवलाहुतिमात्रेण राजावारोग्यतां लभेत् ॥
वगले इति यो द्विस्त्राप्यक्षोभैयंत्र चारयेत् ।
पथिस्था विघ्नदाः सर्व्वे पलायन्ते तमीक्षिताः ॥
भवेन्नि सफलं कर्म्म वगलेति स्मरन् जनः ।
वगलाजापिनं दृष्ट्वा सर्व्वे भीतिमवाप्नुयुः ॥
केवलं पटलमिदं पठन् प्रदधन् मनोरथम् ।
लभेत् कालि ! वपुस्त्यक्त्वा वगलाञ्च न संशयः ॥
एषा विद्या मसीशेन सदोपास्या न संशयः ।
ब्राह्मणे वगलायाञ्च चिन्तयेदेकरूपतः ॥
विना प्रयुक्तिमपि च मसीशं श्रावयेद्द्विजः ।
श्रावणायां धनाकाङ्क्षी न भवेद्ब्राह्मणोत्तमः ॥
आलस्याद्वा प्रमादाद्वा श्रावयेन्न यदि द्विजः ।
मसीशहत्याभागी स्याच्छ्रावयित्वा तव प्रियः ॥
ब्राह्मणोऽपि वरारोहे ! प्रशृणुयात् भक्तितत्परः ।
निर्व्वाणं लभते कालि ! निष्कामी कोऽपि चेत् पठेत् ।
एतदुक्तोऽपि कायस्थः प्रशृणुयान्न यदि प्रिये ! ।
पटलं श्राव्यरचाद्य ब्रह्महत्याफलं लभेत्" ।
इति आचारनिर्णयतन्त्रे वासुदेवसम्मते हर-पार्व्वतीसंवादे त्रयस्त्रिंशत्तमः पटलः ॥

"चाटचारणचौरेभ्यो वधबन्धभयादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थेभ्यो विशेषतः" ।
इति वह्निपुराणे पाशुपतदानाध्यायः । * ।

गौड़देशे तेषामागमनकारणम् । तत्रादौ मङ्गलाचरणं यथा,—

"यस्माद्भूद्भूमिदेवो वदनसरसिजेषद्भुजेभूमिपालो वक्षोर्व्वोर्व्वैश्य एव द्विजभजनरतिर्यस्य शूद्रःपदाब्जे । लक्ष्या पातिंश्यतीदं जगदिति प्रकृतिर्यः स्वयं पूरुषस्तं वन्देऽहं देवदेवं त्रिगुणमयवरं सर्व्व लोकानुकम्पम्" ॥

अथ आदिशूरराजप्रशंसा ।

"श्रीमद्राजादिशूरोऽभवदवनिपतिर्धर्म्मराजो व शास्ता सल्लोकः सद्विचारैरदितिसुतपतिः स्वयंचाशी-दतथासीत् । प्रातापादित्यतप्ताखिलतिमिररिपु-स्तत्ववेत्ता महात्मा जित्वा बुद्धांश्चकार स्वयमपि नृपतिर्गौड़राज्याभिरक्तान्" ॥ * ॥ अथादि-शूरस्य पात्रं प्रति चतुर्ब्राह्मणकुलीनशूद्रयोः प्रश्नस्योत्तरञ्च ।"पात्रं पप्रच्छ पूतं परमसुरपद-द्वन्द्वपद्मार्चकोऽसौ कासन्ते काश्यपीशाः चतु-रतिकुशलाः क्वापि शूद्राः कुलीनाः । पात्रस्तेषा-मवोचत् परिचयमखिलं भूपवाक्यात् द्विजास्ते कोलाञ्चस्थाः कुरङ्गा इव किल तपसा नैव केषा-मधीनाः ॥ कोलाञ्चस्य महीपतिः क्षितिभुजा-मेकप्रधानः प्रधी स्वेष्टे निष्ठमतिर्महाशयवरं श्रीवीरसिंहः स्वभूत् । तद्देशवासिनः समाधि-कृतिनः पापालिसंहारिणः सन्ति व्यासमाः सभासद इतो गौड़ेन्द्रभूमीश्वराः" ॥ * ॥

अथ वीरसिंहं प्रति लिपिप्रेरणम् ।

"भूपोऽभूद्भवने स्वचेष्टितपरः सद्भृत्यभार्य्यान्वितान् भूदेवान् दधवान् विचित्रलिखनैरानेतुकामः स्वयम् । पात्रेण प्रणयप्रमोदरचितां श्रीवीरसिंहे लिपिं गौड़क्ष्मापतिरेव पुण्यसुमतिर्दूतेन प्रास्थापयत्" ॥*॥

अथ लिपिप्रकारः ।

"सुकृतसुकृतसंघाः सर्व्वशास्त्रार्थदक्षा
जपितहुतविपक्षाः सत्तिवाक्याः श्रुतिज्ञाः ।
सजितसुगतवृन्दे गौड़राज्ये मदीये
द्विजकुलवरजाताः सानुकम्पाः प्रयान्तु ॥
नृपतिसुकृतिसारः स्वीयवंशावतारः
प्रबलबलविचारो वीरसिंहोऽतिवीरः ।
मयि त्वरसहितास्ते भूमिदेवान् सशूद्रान्
पुनरपि मम गौड़े प्रापय त्वं नितान्तम्" ॥*॥

अथ ब्राह्मणशूद्राणां गौड़देशे गमनेच्छा ।

"मुदा गन्तुकामाः पुरावासगौड़ाः
समाहाय कोलाञ्चदेशं क्षितीशम् ।
नृपाज्ञाञ्च लब्ध्वा सदारादिभृत्या
महायोगिनस्ते बभूवुः सशूद्राः" ॥ * ॥

अथादिशूरसमीपे ब्राह्मणप्रेरणम् ।

"महाराजराजादिशूरो महात्मा
त्वया वीरसिंहस्य मेऽत्थादिसख्यम् ।
तवाज्ञानुसाराद्धि प्रस्थापयामि
द्विजान् पञ्चगोत्रान् सदारादिभृत्यान्" ॥ * ॥

अथ ब्राह्मणानां गमनम् ।

"चलच्चलाश्वाश्रियानाः प्रधाना
वहत्श्मश्रुगुम्फातिशोभाननाभाः ।
क्रतुज्ञाः स्मृतिज्ञाः प्रतिज्ञानसाध्याः
सवर्म्मास्त्रशस्त्राः प्रयाताः प्रयागम् ॥
ततः स्नानदानादि कृत्वा च विप्राः
ययुस्तेऽपि वाराणसीं पञ्चगोत्राः ।
ततो विश्वनाथं समालोक्य दानै-
र्यशः प्राप्य तस्माद्ययाभू मिमाद्याः" ॥ * ॥